শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৩

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৮৩

*পৌণ্ড্রকৱধৱর্ণনং কাশীপুরিদাহৱর্ণনং*
*দ্বিৱিদৱধৱর্ণনং লক্ষণাস্বযংৱরং চ*

রামেথ গোকুলগতে প্রমদাপ্রসক্তে
হূতানুপেতযমুনাদমনে মদান্ধে।
স্বৈরং সমারমতি সেৱকৱাদমূঢো
দূতং ন্যযুঙ্ক্ত তৱ পৌণ্ড্রকৱাসুদেৱঃ॥ ১ ॥

নারাযণোহমৱতীর্ণ ইহাস্মি ভূমৌ
ধৎসে কিল ত্বমপি মামকলক্ষণানি।
উৎসৃজ্য তানি শরণং ৱ্রজ মামিতি ত্বাং
দূতো জগাদ সকলৈর্হসিতঃ সভাযাম্॥ ২ ॥

দূতেথ যাতৱতি যাদৱসৈনিকৈস্ত্ৱং
যাতো দদর্শিথ ৱপুঃ কিল পৌণ্ড্রকীযম্।
তাপেন ৱক্ষসি কৃতাঙ্কমনল্পমূল্য-
শ্রীকৌস্তুভং মকরকুণ্ডলপীতচেলম্॥ ৩ ॥

কালাযসং নিজসুদর্শনমস্যতোস্য
কালানলোৎকরকিরেণ সুদর্শনেন।
শীর্ষং চকর্তিথ মমর্দিথ চাস্য সেনাং
তন্মিত্রকাশিপশিরোপি চকর্থ কাশ্যাম্॥ ৪ ॥

জাল্যেন বালকগিরাপি কিলাহমেৱ
শ্রীৱাসুদেৱ ইতি রূঢমতিশ্চিরং সঃ।
সাযুজ্যমেৱ ভৱদৈক্যধিযা গতোভূৎ
কো নাম কস্য সুকৃতং কথমিত্যৱেযাৎ॥ ৫ ॥

www.prapatti.com

কাশীশ্বরস্য তনযোথ সুদক্ষিণাখ্যঃ
শর্বং প্রপূজ্য ভৱতে ৱিহিতাভিচারঃ।
কৃত্যানলং কমপি বাণরণাতিভীতৈ-
র্ভূতৈঃ কথঞ্চন ৱৃতৈঃ সমমভ্যমুঞ্চত্॥ ৬ ॥

তালপ্রমাণচরণামখিলং দহন্তীং
কৃত্যাং ৱিলোক্য চকিতৈঃ কথিতোপি পৌরৈঃ।
দ্যূতোতসৱে কিমপি নো চলিতো ৱিভো ত্বং
পার্শ্বস্থমাশু ৱিসসর্জিথ কালচক্রম্॥ ৭ ॥

অভ্যাপতত্যমিতধাম্নি ভৱন্মহাস্ত্রে
হা হেতি ৱিদ্রুতৱতী খলু ঘোরকৃত্যা।
রোষাত্ সুদক্ষিণমদক্ষিণচেষ্টিতং তং
পুপ্লোষ চক্রমপি কাশিপুরীমধাক্ষীত্॥ ৮ ॥

স খলু ৱিৱিদো রক্ষোঘাতে কৃতোপকৃতিঃ পুরা
তৱ তু কলযা মৃত্যুং প্রাপ্তুং তদা খলতাং গতঃ।
নরকসচিৱো দেশক্লেশং সৃজন্ নগরান্তিকে
ঝটিতি হলিনা যুধ্যন্নদ্ধা পপাত তলাহতঃ॥ ৯ ॥

সাম্বং কৌরৱ্যপুত্রীহরণ নিযমিতং সান্ত্বনার্থী কুরূণাং
যাতস্তদ্বাক্যরোষোদধৃতকরিনগরো মোচযামাস রামঃ।
তে ঘাত্যাঃ পাণ্ডৱেযৈরিতি যদুপৃতনাং নামুচস্তৱং তদানীং
তং ত্বাং দুর্বোধলীলং পৱনপুরপতে তাপশান্ত্যৈ নিষেৱে॥ ১০ ॥

**********